# झारखण्ड शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद, राँची ।

वार्षिक परीक्षा 2022-23, (मॉडल प्रश्न-पत्र) (विषयनिष्ठ Subjective)

कक्षा-दशमी, विषय:-संस्कृतम्, समय:- सार्द्ध-एक-होरा, पूर्णांका:- 40 अंकाः ।

---

**सामान्य-निर्देशाः-**

**1. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृते एव कर्तव्याणि-**

**2. अस्मिन् प्रश्नपत्रे त्रयः खण्डाः सन्ति । सर्वेषां प्रश्नानाम् संख्याः 19 सन्ति।**

**3. प्रश्न-संख्या 1 तः 7 पर्यन्तम् अति- लघूत्तरीयाः प्रश्नाः सन्ति। अस्य कृते 2-2 अंकौ निर्धारितौ स्तः। केचन पंचानाम् प्रश्नानाम् उत्तराणि देयानि।**

**4. प्रश्न-संख्या 8 तः 14 पर्यन्तम् लघूत्तरीया: प्रश्ना: सन्ति।।अस्य कृते 3-3 अंका: निर्धारिता: सन्ति। केचन पंचानाम् प्रश्नानाम् उत्तराणि देयानि।**

**5. प्रश्न-संख्या 15 तः 19 पर्यन्तं दीर्घूत्तरीयाः प्रश्नाः सन्ति । अस्य कृते 5-5 अंकाः निर्धारिताः। केचन त्रयाणाम् प्रश्नानाम् उत्तराणि देयानि ।**

**"खण्ड क"** (10 अंकाः)

**निर्देशः-** निम्नलिखितं गद्यांशं पद्यांशं नाट्यांशं च पठित्वा **केवलं पञ्चानां प्रश्नानाम् उत्तराणि एव देयानि --** (2x5=10)

"कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत्। एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्श्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत्।"

**पूर्णवाक्येन उत्तरत-**

1. कीदृशः जनः परिश्रमं कृत्वा धनमर्जितवान्? (2)
2. किं विहाय सः पदातिरेव प्राचलत् ? (2)
3. "निर्धनः जनः" अत्र विशेषणपदं किम्? (2)

**निर्देशः- अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत-**

"आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।
नास्त्युद्यमसमः बन्धुः कृत्वा यं नावसीदति ॥ "

**पूर्णवाक्येन उत्तरत-**

Jharnet.com fb.me/jharnets t.me/jharnets

4. अस्माकं महान् रिपुः कः वर्तते ? (2)

5. "मित्रम्" इति पदस्य विलोम-पदम् गद्यांशे किम् प्रयुक्तम् ? (2)

**निर्देशः-** Q.(3) अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत -

"सिंहः- (क्रोधेन गर्जन्) भोः! अहं वनराजः किं भयं न जायते? किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा ?

एकः वानरः - यतः त्वं वनराजः भवितुं तु सर्वथाऽयोग्यः । राजा तु रक्षकः भवति परं भवान् तु भक्षकः । अपि च स्वरक्षायामपि समर्थः नासि तर्हि कथमस्मान् रक्षिष्यसि ?"

**पूर्णवाक्येन उत्तरत-**

6. 'यतः त्वं वनराजः भवितुं तु सर्वथाऽयोग्यः।' इति कः कथयति? (2)

7. "राजा तु रक्षकः" अत्र विशेषेण-पदं किम् अस्ति? (2)

**खण्ड-ख (15)**

**निर्देशः- (अस्मिन् खण्डे केवलं पञ्चानां प्रश्नानाम् उत्तराणि एव देयानि )**

**अधोलिखित - श्लोकस्य अन्वयं मंजूषायाः पदानि चित्वा पूरयत (3)**

" शरीरायासजननं कर्म व्यायामसंज्ञितम् ।

तत्कृत्वा तु सुखं देहं विमृद्नीयात् समन्ततः॥"

**8. अन्वयः** - शरीरस्य आयास-जननं कर्म व्यायामसंज्ञितम् (i) - - - - - - तु (ii) - - - - - - सुखं (iii) - - - - - विमृद्नीयात्।

**मंजूषा-** (देहम्,समन्ततः,तत्कृत्वा)

**निर्देशः-** अधोलिखितश्लोकस्य भावार्थं मञ्जूषातः उचितं पदं चित्वा पूरयत - **(3)**

"सेवितव्यः महावृक्षः फलच्छाया समन्वितः ।

यदि दैवात् फलं नास्ति छाया केन निवार्यते ॥"

**9. भावार्थः** - संसारे सदैव फलैः छायया च युक्तः महान् वृक्षः (i) - - - - - - -भवति। यदि दुर्भाग्यवशात् तस्मिन् वृक्षे (ii)------------न अपि भवेयुः तथापि तम् (iii) -------------दातुम् कश्चित् अपि रोद्धं न शक्नोति।

**मञ्जूषा-** (आश्रयितव्यः, छायाम्, फलानि )

**10. समुचितं कालबोधकं शब्दं लिखत- (3)**

(i) जननी प्रातः - - - -- (09:00) वादने उत्तिष्ठति ।

(ii) छात्रः विद्यालयं - - - - - - - (09:15) वादने गच्छति ।

Jharnet.com fb.me/jharnets t.me/jharnets

(iii) देवः सायं --------(05:45) वादने भ्रमति ।

**11. वाच्यस्य नियमानुगुणम् विकल्पं शुद्धं चिनुत- (3)**

(i) देवः -------------खादति ।

(क) फलम्   (ख) फलेन   (ग) फलस्य   (घ) फलात्

(ii) लतया पुस्तकम् - - - - -  ।

(क) पठन्ति   (ख) पठ्यते   (ग) पठानि   (घ) पठ्यन्ते

(iii) मया उच्चैः - - - - - - - - ।

(क) हस्यते   (ख) हसति   (ग) हसामि   (घ) हसन्ति

**12. रेखांकितपदम् अशुद्धम् अस्ति । शुद्धं कुरुत- (3)**

(i) सः पाठं **पठन्ति** ।

(ii) अहं विद्यालयं श्वः **गच्छामि**

(iii) **सः** बालिका अस्ति ।

**13. रेखांकित-पदानां समासं विग्रहं वा चिनुत - (3)**

(i)'**मक्षिकाणाम् अभावः**' अत्र।

(क) मक्षिकाभाव:   (ख) निर्मक्षिकम्   (ग) मक्षिभाव:   (घ) निर्मक्षिका

(ii) '**अयोग्यः**' पुरुषः नास्ति।

(क) आ योग्य:   (ख) न योग्य:   (ग) आम् योग्य:   (घ) नञ् योग्यः

(iii) '**दशरथस्य पुत्रः**' रामः आसीत्।

(क) दशरथायपुत्र:   (ख) दशरथपुत्रः   (ग) दशरथेपुत्रः   (घ) दशरथपुत्राय

**14. अधोलिखित- समानार्थक - पदैः मेलनं कुरुत - (3)**

| | |
|---|---|
| (i) चक्षुर्भ्याम्. | (क) वृषभः |
| (ii) जवेन. | (ख) देवराजः |
| (iii) इन्द्रः. | (ग) नेत्राभ्याम् |
| (iv) शीघ्रम्. | (घ) अचिरम् |
| (v) बलीवर्दः. | (ङ) सुताः |

(vi) पुत्राः.                (च) तीव्रगत्या

**खण्ड - ग (15)**

**( अस्मिन् खण्डे केवलं त्रयाणां प्रश्नानाम् उत्तराणि एव देयानि -)**

**15. अवकाशाय प्रधानाध्यापकं प्रति लिखितमिदं पत्रं मंजूषा- सहायतया पूरयत-** **(5)**

(i)------------------,

प्रधानाध्यापक-महोदय!

कखग - उच्च विद्यालयः रॉचीनगरम्।

विषय:- अवकाशाय आवेदनपत्रम्।

महाशय,

सविनयं (ii)------------- इदम् अस्ति यत् (iii) ------------ ह्यः ज्वरेण (iv)----------- आसम्। अस्मात् (v)-------------अहं विद्यालयम् आगन्तुम् (vi)----------- अस्मि। चिकित्सकः मम कृते विश्रामं कर्तुं (vii)-----------दतवान्। अत एव त्रयाणां दिवसानां (viii)-------------- प्रदाय ममोपरि भवान् (ix)------------करोतु। एतदर्थं सदैव ऋणी भविष्यामि ।

सधन्यवादः ।

भवतः (x)---------------छात्रः

महेश्वरः , कक्षा - नवमी ।

तिथि:-------------

**मंजूषा** - (अनुग्रहं, सेवायाम् , पीडितः, असमर्थः, कारणात् , परामर्शम्, आज्ञाकारी, अवकाशम् , निवेदनम् , अहम् )

**16. चित्रं दृष्ट्वा संस्कृते पञ्च-वाक्यानि विरचयत-** **(5)**



**मंजूषा** (नदी, जनाः, तरन्ति, वार्तालापं, क्रीडतः, नदीतीरे, वृक्षः, व्यायामम्, शीतलम्, जलम्, अधः, नद्याम्)

**17. 'मम विद्यालयः'** इति विषयम् अधिकृत्य संस्कृते पञ्चवाक्येषु मंजूषा-सहायतया अनुच्छेदं लिखत- (5)

**मञ्जूषा-** (आदर्शः विद्यालयः, श्रेष्ठः प्राचार्यः, शिक्षकाः, विषयान्, सहस्रं छात्राः, बालक-बालिकाः, नगरे, पंक्तिबद्धाः, प्रार्थयन्ति, वृक्षाः, क्षेत्रम्, उद्यानम् )

**18. स्थूलाक्षरपदानि आधृत्य प्रश्ननिर्माणं कुरुत-** (5)

(क) **शिविना** विना इदं दुष्करं कार्यं कः कुर्यात्।

(ख) प्राणेभ्योऽपि प्रियः **सुहृत्।**

(ग) **आर्यस्य** प्रसादेन मे वणिज्या अखण्डिता ।

(घ) प्रीताभ्यः प्रकृतिभ्यः **राजानः** प्रतिप्रियमिच्छन्ति ।

(ङ) **तृणानाम्** अग्निना सह विरोधो भवति ।

**19. अधोलिखित - वाक्यानि घटनाक्रमानुसारेण योजयत -** (5)

(क) जम्बुककृतोत्साहः व्याघ्रः पुनः काननम् आगच्छत् ।

(ख) मार्गे सा एकं व्याघ्रम् अपश्यत् ।

(ग) व्याघ्रं दृष्ट्वा सा पुत्रौ ताडयन्ती उवाच - अधुना एकमेव व्याघ्रं विभज्य भुज्यताम् ।

(घ) व्याघ्रः व्याघ्रमारी इयमिति मत्वा पलायितः ।

(ङ) बुद्धिमती पुत्रद्वयेन उपेता पितुर्गृहं प्रति चलिता ।

******************************************************************************

Jharnet.com fb.me/jharnets t.me/jharnets